यान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादिति”। “अत ऊर्द्ध्वं सपिण्डीकरणान्तश्राद्धनिमित्तादाद्यसंवत्सरादूर्द्ध्वं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात्। व्यासः “प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि”। एतेन सपिण्डीकरणापकर्षे चाद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम्। अत्रमाह हेमाद्रिधृतवचनम् “पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्त्तितम्। तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते”। अत्र पूर्णसंवत्सरक्रियमाणश्राद्धाद्यधोभयनिर्वाहस्तथापकृष्टसपिण्डीकरणश्राद्धादप्युभयनिर्वाहो न पूर्णसंवत्सरे चाब्दिकान्तरम्। एवं पञ्चदश श्राद्धेऽप्यूह्येयम्। मत्स्यपु० “ततः प्रभृति संक्रान्तावुपरागादिपर्वसु। त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि”। ततः प्रेतत्वपरिहारात्, त्रिपिण्डं त्रिपुरुषम्। निरुपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः। उपपदात्तु क्वचित्तिथिविशेषमात्रपरः। यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ। शङ्खः “सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्य्यात् वर्जयित्वा मृताहनि। अमावास्या क्षयो यस्य प्रेतपक्षेऽथ वा पुनः। सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्वणो विधिः” श्रा०त०। अधिकम् एकोद्दिष्टशब्दे १५२१पृ० पार्वणशब्दे ४२१८पृ० च दृश्यम्।

**सांवादिक** पु० सम्यग्वादायालं ठञ्। १नैयायिके जटा०। संवाददातरि च। [अमरः। २संशयविषये च।

**सांशयिक** त्रि० संशयमापन्नः ठञ्। १सन्दिहाने संशययुक्ते

**सांसारिक** त्रि० संसाराय हितम् तत्र भवो वा ठक्। १संसारभवे २संसारोपयोगिनि वा पदार्थे।

**सांसिद्धिक** त्रि०संसिद्धिः स्वभावसिद्धिः तया निर्वृत्तं ठञ्। स्वभावसिद्धे “सांसिद्धिकमुदाहृतम्” भाषाप०।

**साकम्** अव्य० सह अकति अक-असु सादेशः। १साहित्ये २सहार्थे अमरः। तद्योगे गौणक्रियान्वयिनि तृतीया।

**साकल्य** न० सकलस्य भावः ष्यञ्। १समुदाये। स्वार्थे ष्यञ्। २सकले होमार्थं मिश्रितेषु ३तिलादिद्रव्येषु च।

**साकाङ्क्ष** त्रि० सहाकाङ्क्षया सहस्य सः। १साभिलाषे शाब्दबोधोपयोग्याकाङ्क्षायुक्ते २पदभेदे च। [२सावयवे च।

**साकार** त्रि०सह आकारेण मूर्त्या। १मूर्त्तिविशिष्टे देवादौ

**साकुरुण्ड** पु० सकुरुण्ड एव स्वार्थे अण्। सकुरुण्डवृक्षे (झिन्टिफल वृक्षे) राजनि०।

**साकेत** न० आकित्यते आकेतः सहाकेतेन। अयोध्यापुरे शब्दर० “जनस्य साकेतनिवासिनस्तौ” इति रघुः।

**सात्तुक** पु० सक्तवे हितः गुडा० ठञ्। १यवे सि०कौ०। सक्तूनां समाहारः तस्येदम् वा ठञ्। २सक्तुसमूहे न० ३तत्सम्बन्धिनि च त्रि०।

**साक्षात्** अव्य० सह अक्षति अक्ष-आति सादेशः, सह अक्ष्णा सतति अत-क्विप् वा। १लौकिकप्रत्यक्षे २तुल्ये च अमरः साक्षादा०कृञि वा उप०समासः। साक्षात्कृत्य कृत्वा वा। ३तद्रूपे चैतन्ये च “यत्साक्षात् दपरोक्षाद्ब्रह्म” श्रुतिः।

**साक्षात्कार** पु० साक्षात्+कृ-घञ् साक्षादि० उप०। लौकिकसन्निकर्षजन्ये प्रत्यक्षे।

**साक्षिन्** त्रि०सह-अक्षि अस्य इनि “साक्षाद् द्रष्टरि” पा०इनि वा नि०। १साक्षाद्द्रष्टरि। स्त्रियां ङीप्। २परमेश्वरे पु० “साक्षी चेताः केवलोनिर्गुणश्च” श्रुतिः। अयमेव साक्षिचैतन्यत्वेन वेदान्तपरिभाषादौ स्वीकृतोऽनुपदं वक्ष्यते। व्यवहारे साक्षिलक्षणादिकं वीर०मि० निरूपितं यथा “तत्र प्रमाणभेदप्रमाणविषयव्यवस्थे क्रियापादप्रस्तावे विविक्ते। अधुना साक्ष्यप्रमाणस्यावान्तरभेदः प्रस्तूयते। तत्र साक्षिस्वरूपमाह मनुः “समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिद्ध्यति”। समक्षदर्शनस्य साक्ष्यहेतुत्वं पाणिनिरपि स्मरति। “साक्षाद् द्रष्टरि संज्ञायामिति”। तत्तु व्युत्पत्तिमात्रमव्यापकत्वात्। श्रुतसाक्ष्यादीनामपि साक्षित्वव्यवहारविषयत्वात्। अतएव श्रवणादित्युपलक्षणं प्रमाणमात्रस्य, विवादविषयप्रमाता साक्षीति विवक्षितम्। साक्षिप्रयोजनमाह नारदः “सन्दिग्धेषु तु कार्य्येषु द्वयोर्विवदमानयोः। दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तिदर्शनम्” इति। दृष्टश्रुताभ्यामनुभूतत्वादित्यर्थः। यद्वा दृष्टत्वात् श्रुतत्वादनुभूतत्वाच्चेत्यर्थः। अनुभूतत्वादित्यनेन च गोवृषभन्यायेन प्रमाणान्तरजन्योऽनुभवो गृह्यते। व्यक्तिदर्शनं विवेकज्ञानम्। कात्यायनः “अर्थिप्रत्यर्थिसान्निध्यादनुभूतन्तु यद्भवेत्। तद्ग्राह्यं साक्षिणो वाक्यमन्यथा न बृहस्पतिः” अर्थिप्रत्यर्थिसान्निध्यादनुभूतमिति मुख्यः कल्पः। तदसान्निध्येऽपि श्रवणादिना साक्ष्यस्य वचनान्तरैरनुमतत्वात्। तच्च साक्षिभेदनिरूपणे व्यक्तीभविष्यति। गौतमः “विप्रतिपत्तौ साक्षिनिमित्ता व्यवस्था”। स च साक्षी प्रथमं द्विविधः कृतोऽकृतश्च। साक्षित्वेनार्थिप्रत्यर्थिभ्यां निरूपतः कृतः। अनिरूपितोऽकृतः। पुनश्च कृतस्य